# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – २ | प्रश्नपत्रम् – ३ | गुणाः – ५० |
| विषयः – स्वामिनारायणवेदान्तः (J) | सत्रम् – ४ | समयः – १० तः १२ |
| दिनाङ्कः – १५/०७/२०२१ | सन्दर्भग्रन्थः – मुण्डमाण्डूक्योपनिषदौ | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः मन्त्रयोः यथाभाष्यं व्याख्या कार्या।**

१ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्।
सुषुप्तस्थान एकीभूतः प्रज्ञानघनः एव आनन्दमयो ह्यानन्दभुक् चेतोमुखः
प्राज्ञस्तृतीयः पादः॥

२ एषः सर्वेश्वरः एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य।
प्रभवाप्ययौ हि भूतानाम्॥

३ अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः एवमोङ्कार आत्मैव
संविशत्यात्मनाऽऽत्मानम् य एवं वेद य एवं वेद॥

४ तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो
ज्योतिषम् इति। अथ परा यया तदक्षमधिगम्यते॥

**प्रश्नः २** प्रवणस्य अवस्थात्रयं माण्डूक्यानुगुणं विवेचयत।

**प्रश्नः ३** माण्डूक्योपनिषदः शान्तिमन्त्रः व्याख्येयः।

**प्रश्नः ४** पराविद्यां विवेचयत।

**प्रश्नः ५** प्रथममुण्डकस्य सारः लेख्यः।

**प्रश्नः ६ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या।**

१ प्लवा ह्येते अदृढा यज्ञरूपाः अष्टादशोक्तमवरं येषु कर्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढाः जरामृत्युं ते पुनरेवापियन्ति॥

२ द्वा सुपर्णा सयुजा सखाया समान वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥

३ हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥

४ क्रियावन्तः श्रोत्रियाः ब्रह्मनिष्ठाः स्वयं जुह्वते एकर्षि श्रद्धयन्तः ।
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥

**प्रश्नः ७** द्वितीयमुण्डकस्य सारः लेख्यः ।

**प्रश्नः ८** मुमुक्षोः गुरूपसदनप्रकारः निरूपयत ।

**प्रश्नः ९** तृतीयमुण्डकाधारेण जीवब्रह्मणोः वैलक्षण्यम् उपपादयत ।

**प्रश्नः १०** मुण्डकोपनिषदः सारः लेख्यः ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ श्रीमता गोपालानन्दस्वामिना उपनिषत्सु का टीका रचिता ?
२ मुण्डकोपनिषत् कं वेदमनुसरति ?
३ माण्डूक्योपनिषत् कं वेदमनुसरति ?
४ माण्डुक्योपनिषदः विषयः कः ?
५ प्रणवः कति मात्रकः ?
६ अवस्थात्रिकं किम् ?
७ का नाम अपराविद्या ?
८ का नाम पराविद्या ?
९ देवानां प्रथमः कः सम्बभूव ?
१० ब्रह्म केन चीयते ?
११ कः धनुः ?
१२ अथर्ववेदस्य शान्तिमन्त्रं लिखत ।
१३ मुण्डकस्य प्रसिद्धं वाक्यं किम् ?
१४ शरः कः ?
१५ सप्तार्चिः इति कस्य नाम ?

****